# 53 - त्रिपञ्चाश दशकम्
# धेनुकासुर वधम्

अतीत्य बाल्यं जगतां पते त्वम् उपेत्य पौगण्ड वयो मनोज्ञं ।
उपेक्ष्य वत्सावन मुत्सवेन प्रावर्तथा गोगण पालनायाम् ॥ ॥53-1॥

उपक्रमस् यानुगुणैव सेयं मरुत्पुराधीश तव प्रवृत्तिः ।
गोत्रा परित्राण कृतेऽवतीर्णः तदेव देवाऽऽरभथास् तदा यत् ॥ ॥53-2॥

कदापि रामेण समं वनान्ते वनश्रियं वीक्ष्य चरन् सुखेन ।
श्रीदाम नाम्नस् स्वसखस्य वाचा मोदा दगा धेनुक काननं त्वम्॥53-3॥

उत्ताल ताली निवहे त्व दुक्त्या बलेन धूतेऽथ बलेन दोर्भ्याम् ।
मृदुः खरश् चाभ्यपतत् पुरस्तात् फलोत्करो धेनुक दानवोऽपि ॥53-4॥

समुद्यतो धैनुक पालनेऽहं कथं वधं धैनुक मद्य कुर्वे ।
इतीव मत्वा ध्रुव मग्रजेन सुरौघ योद्धार मजीघनस् त्वम् ॥ ॥53-5॥

तदीय भृत्या नपि जम्बुकत्वेन उपागतान् अग्रज संयुतस् त्वम् ।
जम्बूफला नीव तदा निरास्थः तालेषु खेलन् भगवन् निरास्थः ॥ ॥53-6॥

विनिघ्नति त्वय्यथ जम्बु कौघं सनामकत्वाद् वरुणस् तदानीम् ।
भयाकुलो जम्बुक नामधेयं श्रुति प्रसिद्धं व्यधितेति मन्ये ॥ ॥53-7॥

तवावतारस्य फलं मुरारे सञ्जात मद्येति सुरैर् नुतस् त्वम् ।
सत्यं फलं जात मिहेति हासी बालैस्समं तालफलान्य भुङ्क्थाः ॥ ॥53-8॥

मधुद्रव स्रुन्ति बृहन्ति तानि फलानि मेदोभर भृन्ति भुक्त्वा ।
तृप्तैश्च दृप्तैर् भवनं फलौघं वहद्भिरागाः खलु बालकैस् त्वम् ॥ ॥53-9॥

हतो हतो धेनुक इत्युपेत्य फलान्यदद्भिर् मधुराणि लोकैः ।
जयेति जीवेति नुतो विभो त्वं मरुत्पुराधीश्वर पाहि रोगात् ॥ ॥53-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥